National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 182-183
© 2025 NJHSR
www.sanskritarticle.com

**काकली साँतरा**
सहकारी अध्यापिका,
श्रीरामकृष्णः -सारदा -विद्यामहापीठः,
कामारपुकुरः, हुगली

**Correspondence:**
**काकली साँतरा**
सहकारी अध्यापिका,
श्रीरामकृष्णः -सारदा -विद्यामहापीठः,
कामारपुकुरः, हुगली

# पाणिनीयशिक्षायाः साधारणतयाः पर्यालोचनाः

**काकली साँतरा**

षट् वेदाङ्गेषु शिक्षा अन्यतमं वेदाङ्गिमतिगृह्यते।तैत्तिरीयोपनिषदिसर्वप्रथमं तावन् शिक्षायाः उल्लेखः प्राप्यते। तत्रोच्यते -"शिक्षां व्याख्यास्यामः"मुण्डकोपनिषदि उक्तम् - 'शिक्षा-कल्प-व्याकरण-छन्दो-ज्योतिषमिति 'शङ्कराचार्येणोक्तम् -'शिक्षा-शिक्ष्यतेऽनयेति वर्णाद्युच्चारण लक्षणम्'। अपि चोक्तं सायण-भाष्ये-'वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा'। वस्तुतस्तु शिक्षा नाम वर्णाद्युच्चारण-प्रकारवोधको ग्रन्थविशेषः। अतएव वेदविहितानां मन्त्राणाम् उच्चरणे शुद्ध्यशुद्धयोः विचाराय शिक्षाग्रन्थस्य उद्भवोऽभवत्- इत्यस्मिन् विषये नास्ति कोऽपि सन्देहावसरः।वस्तुतो हि आधुनिकः परिभाषायां ध्वनिविज्ञानमिति परिगण्यते।तेनोक्तम्-'शिक्षां घ्राणं तु वेदस्य'।

यथा प्रत्येकस्य वेदस्य प्रातिशाख्यग्रन्थोऽस्ति तथैवास्ति शिक्षाग्रन्थः। यतः वर्णदोषात् स्वरदोषाच्च मन्त्रविकारे सति वेदस्य अपौरुषेयत्वं विनश्यति। कालक्रमेण वहवः शिक्षाग्रान्थाः विरचिता भवन्ति। एतेषु मुख्यानि यथा ऋग्वेदस्य यजुर्वेदस्य च पाणिनीयशिक्ष, सामवेदस्य नारदीयशिक्षा अर्थववेदस्य माण्डुक्यशिक्षा, कृष्णयजुर्वेदस्य व्यासशिक्षा, शुक्लयजुर्वेदस्य याज्ञवल्क्यशिक्षा चेति।

वहुषु शिक्षाग्रन्थेषु पाणिनीयशिक्षा प्रामणिकतमा प्राचीनतमेति च मन्यते। परन्तु कोऽयं ग्रन्थस्य ग्रन्थकारः इत्यस्मिन् विषये अस्ति वितण्डावसरः। तत्र पणिनीयशिक्षायाः सूचनायामुक्तम् - 'अथ शिक्षा प्रवक्ष्यामि पाणिनीयं मतं यथा'। अपि च चत्वारिंशत् कारिकायामुक्तम् -'दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि'।उक्तञ्च 'तस्मै पाणिनये नमः' एते उल्लेखाः प्रमाणीकुर्वन्ति यत् पाणिनीयशिक्षायाः ग्रन्थकारः पाणिनिरेव इत्यस्मिन् विषयेऽस्ति सन्देहावसरः। वस्तुतस्तु 'शिक्षाप्रकाश इति पाणिनीयशिक्षायाः टीकाग्रन्थे उक्तम् - 'पिङ्गलाचार्यस्तन्मतमनुभाव्य शिक्षां वक्तुं प्रतिजानीते'। अस्मात् उल्लेखात् अनुमीयते यत् - पाणिनिसम्मतान् सर्वान् विषयान् उपजीव्य पिङ्गलार्यः पाणिनिशिक्षा नामकं ग्रन्थं विरचितान् इति। येन केन वा रचितं भवतु पाणिनीशिक्षा शिक्षाग्रन्थेषु सर्वोत्तमेति नास्ति संशयावसरः।

तैत्तिरीयोपनिषदः शिक्षावल्यां ये ये विषयाः सन्ति ते ते पाणिनीयशिक्षायां यथा क्रमेणैव विन्यस्ता सन्ति। इदमेव अस्य सिक्षाग्रन्थस्य महत्वंपूर्णं वैशिष्ट्यम् ।वस्तुतस्तु पञ्चभिः पर्यायैः वर्णः-मात्रा-वल-सामादिविषयाः अस्मिन् ग्रन्थे वैज्ञानिकदृष्ट्या सज्जिताः सन्ति।
पाणिनिशिक्षायां षट् वेदाङ्गानां पृथक् पृथक् रूपेण् उपयोगः वर्णितोऽस्ति। परन्तु मानवदेहस्य अङ्गानि उपजीव्य अयमुपयोगः येन प्रकारेण वर्णितोऽस्ति तस्तु सर्वथैव विस्मयमावहति।यथा-

**"छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् सङ्गमधीत्यैव ब्रह्मलोके महीयते॥"**

वस्तुतस्तु पाणिनिशिक्षा शिक्षाग्रन्थानाम् अर्थवाद इव। कथं शिक्षाग्रान्थाः वेदमन्त्राणां अविकृतोच्चारणे गुरुत्वपूर्णा इति प्रतिपादयन् पाणिनिशिक्षायाः ग्रन्थकारः तेदेव अस्य ग्रन्थस्य महिमानं समुद्घोषयति उक्तञ्च-

**’मन्त्रहीनः स्वरतो वर्णतोवा**
**मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो राजमानं हिनस्ति**
**यथेन्द्रशत्रुःस्वरतोऽपराधात्॥’**

शिक्ष्यते अनया वर्णोच्चारणमिति शिक्षा।मन्त्राणाम् उच्चारणप्रकारं शिक्षयति या सापि शिक्षा।षड्वेदाङ्गेषु शिक्षा अन्यतमो वेदाङ्ग्।तत्रभवता पाणिनीकृता शिक्षा पाणिनीयशिक्षेति अभिधीयते। पाणिनीयशिक्षायाम् चतुःषष्ठी-संख्यका वर्णाः स्वीकृताः।तेषु सन्ति एकविंशति स्वराः। एतेषु स्वरेषु अ-इ-उ-ऋ- इति चत्वारो ह्रस्वदीर्घप्लुतभेदेन द्वादश।ऌ-कारस्य केवलमेव ह्रस्वत्वमस्ति।अत एते त्रयोदशः।

ए-ऐ-ओ-औ इति चत्वारि सन्ध्यक्षरानि।सन्ध्यक्षराणां ह्रस्वत्वं नास्ति।अत एते अष्टः।

कादयो मावसानाः स्पर्शाः। एते पञ्चविंशतिः।

य-र-ल-वा इति चत्वारः अन्तःस्था इत्यभिधीयन्ते।अपि च श-ष-स-हाश्च चत्वारः उष्माण इति विधीयन्ते।

नारदशिक्षामतेन यमो वर्णागम इतुच्यते।शौनकमतेन ’स्पर्शाः यमाननतुनासिकान् स्वान् परेषु स्पर्शोष्वनुनासिकेषु’ इति।चत्वारश्च यमाः स्मृताः। कुं-खुं-गुं-घुमिति यमाः। स्वरमनुभवति इति अनुस्वारः। ’अं‘ इत्येकमनुस्वारस्योदाहरणम्। विविधंसृज्यते क्षिप्यते इति विसर्गः। ’अः‘ इत्येकं विसर्ग्यस्योदाहरणम्।

क ख इत्येको जिह्वामूलीयः। प फ इत्येक उपध्मानीयः।ऌ-कारो ऋ-कारो वा एको दुःस्पृष्टः।मतान्तरेण एकोऽधिकः प्लुतऌकारः स्वीकृतो भवति।अत एव वर्णाः त्रिषष्टीसंख्यका मतान्तरेण च चतुःषष्ठी संख्यका।

पाणिनीयशिक्षायाम् एकविंशतिः स्वराः त्रिचत्वारिंशच्च व्यञ्जनानि इति चतुःषष्ठी वर्णाः स्वीकृताः। तेषाम् उच्चारणस्थानान्यपि उल्लिखितानि सन्ति तत्र।अधुना अस्मिन् प्रबन्धे तानि उच्चारणस्थानानि पर्यालोच्यन्ते निम्नप्रकारेण ।

ङ-कार ञ-कार नकारादिभिः संयुतः यरलवैश्च संयुतः ह्-कारः उरः स्थानोद्भवतीत्युच्यते। अतएव एतादृशस्य इ-कारस्य उरःस्थानसंज्ञा इति। परन्तु, एभिश्च असंयुतस्य ह-कारस्य कण्ठस्थानसंज्ञा भवति। तत्रोदाहरणं दीयते।ह्लादयति-इत्यत्र हकारः कण्ठस्थानीयः।

अकार-हकारौ कण्ठस्थानजातौ। अपि च इकारः चवर्गः यकारः शकारश्च तालुस्थानजाताः ज्ञेयाः। उकार-पवर्गा औष्ठस्थानजातौ। किञ्च ऋकारः टवर्गः रकारः षकारश्च मूर्धन्याः। ऌतुलसाः दन्तस्थानजाताः ज्ञातव्याः।

कवर्गस्य जिह्वामूलत्वं स्वीक्रियते।पुनरेव उक्तञ्च कौमुद्याम्- ’अकुहविसएजनीयानां कण्ठः’ इति। तत्र कवर्गस्य जिह्वामूलस्थान-कथनात् परं कथं पुनःकण्ठस्थानत्वं कथ्यते इति ज्ञायते।कण्ठसमीप जिह्वामूलस्थानोभयपरत्वात् क-वर्गस्य जिह्वामूलत्वं कण्ठस्थानत्वञ्च स्वीकरणीयम्।अथवा जिह्वामूलीयपदस्य वर्णविशेषे रूढिः स्वीक्रियते। तस्मादेव क-वर्गस्य जिह्वामूलकत्वे न दोषः।

अनुस्वारस्य यमानाञ्च वर्णानामुच्चारणस्थानं नासिकेति स्वीक्रियते। अनुस्वारः विसर्गः जिह्वामूलीयः उपध्मानीयः यमाश्च आश्रयस्थानभागिनः भवन्ति। परन्तु ते यत्स्वराश्रिताः तत् स्थानकाः भवन्ति। यथा- रामः -इत्यत्र विसर्गः कण्ठयः। हरिः- इत्यत्र विसर्गः तालव्यः। अतएव उरः कण्ठः शिरःजिह्वामूलं दन्तः नासिका औष्ठः तालु चेति अष्टौ उच्चारणस्थानानि वर्णानाम्।

पाणिनिया तदीये शिक्षाग्रन्थे आदौ एकविंशतिः स्वराः त्रिचत्वारिंशच्च व्यञ्जनवर्णाः पर्यालोचिताः ततः वर्णानामुच्चारण-स्थानान्यपि आलोचितानि। तेषां तु वर्णानां कीदृशी उत्पत्तिप्रक्रिया इति प्रश्नाशङ्कय पुनरेव तत्र भवता सा प्रक्रियापि समुपस्थापिता।अधुना अस्याः प्रकियायाः दिङ्मात्रमुपस्थाप्यते।

आत्मा बुद्ध्या सह अर्थान् सम्यगवगम्य शब्दानुच्चारयन्ति। तदा विवक्षया मनयुङ्क्ते।मनः कायाग्निमाहन्ति। सः मारुतं प्रेरयति। मारुत उरसि चरन् प्रातःसवनयोगं गायत्रं छन्दमाश्रितं तं मन्दं स्वरं जनयति। ततः स मारुतः कण्ठे चरन् माध्यन्दिनयोगं मध्यमं स्वरं जनयति। पुनःशिरसि चरन् तृतीयसवनयोगं तारं स्वरं जनयति।परिशेषे स उदिर्णो मारुतो मूर्ध्नि अभिहतः सन् वक्त्रमापद्य वर्णान् जनयति । तेषां स्वरतः कालतः स्नानात् प्रयत्नानुप्रदानतश्च पञ्चधा विभागः स्मृतः।

वस्तुतो हि शिक्षाविषये अज्ञः वेदपाठकः वर्णदोषात् स्वरदोषाच्च विनश्यतीति पाणिनीयशिक्षायाः सावधानवाणी सर्वेषां वेदपाठकानां कृते महत्वपूर्णमवदानम् इति सत्यमेव।

**सहायकग्रन्थसूची:**

१.पाणिनीयशिक्षा, डाँ कमलाप्रसाद पाण्डेय, विश्वविद्यालय प्रकाशन, वाराणसी, २००३
२.वर्णोच्चारण-शिक्षा, विजयपाल विद्यावारिधि , राम लाल कपूर् ट्रस्ट,२००९
३.पाणिनीयशिक्षा, डाँ राकेश शास्त्री, चौखाम्भा औरियन्टालिया,
४.पाणिनीय-शिक्षा, विद्यासागर डा दामोदर महतो, मोतिलाल बनारसीदास, दिल्ली,१९९०
५.पाणिनीयशिक्षा, शिवराज आचार्यः कौण्डिन्न्यायनः, चौखाम्बा विद्याभवन, वाराणसी,२०२१